# प्रबन्धसारः

लौकिकशब्दानां तथा वैदिकशब्दानाम् अनुशासनार्थं भगवता पाणिनिना अष्टाध्यायीनामकः ग्रन्थः रचितः। कालप्रवाहात् भाषागतशब्दानां मध्ये परिवर्तनं जायते। नूतनशब्दानामपि व्यवहारः दृश्यते। पाणिनिना सूत्रं रचितम्। तदनन्तरं कात्यायनेन वार्त्तिकं रचितम्। तदनन्तरं पतञ्जलिः महाभाष्यं रचितवान्। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति महाभाष्यवचनानुसारं व्याकरणस्य मुख्यप्रयोजनेषु अन्यतमं हि लाघवम्। पाणिनीयव्याकरणे संक्षेपेण पदसिद्धिनिमित्तं बहवः उपायाः स्वीकृताः। तेषु उपायेषु अन्यतमो हि योगविभागरूपोपायः। महाभाष्यकारेण भगवता पतञ्जलिना बह्वत्र सूत्रेषु योगविभागः स्वीकृतः। महाभाष्यकारस्वीकृतयोगविभागाः एव अस्य शोधप्रबन्धस्य विषयः। तत्र प्रत्येकं योगविभागस्य पर्यालोचनायाम् आदौ आक्षेपः उत्थापितः, ततः योगविभागेन आक्षेपस्य समाधानं प्रतिपादितम्। ततः परं योगविभागस्य आवश्यकता अस्ति न वेति समीक्षितम्। अन्ते च काशिकाकारादीनां मतमपि पर्यालोचितम्।

'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। तत्र उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः,

त्रिमुनीनां सामान्यपरिचयः, महाभाष्यग्रन्थस्य परिचयः, सूत्रक्रमः प्रक्रियाक्रमः इत्येते केचन विषयाः संक्षेपेण आलोचिताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इत्यभिधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः संज्ञाकरणादयः प्रायः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। 'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इति नामके द्वितीये अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। ततः प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके तृतीये अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः। 'पदाधिकारस्थानां योगविभागानां समीक्षा' इत्यभिधेये चतुर्थे अध्याये सप्तसूत्राणां योगविभागः आलोचितः। 'अवशिष्टानां योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागोऽत्र समीक्षितः। शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागा आलोचिताः। एतावता पञ्चसु अध्यायेषु आलोचिताः विषयाः उपसंहारे संक्षेपेण वर्णिताः। शोधप्रबन्धस्यान्ते एका परिशीलितग्रन्थपञ्जी प्रदत्ता। एवञ्च अत्यल्पमतिना मया शोधपत्रमिदं विरचितम्।